सत्यात् नास्ति परो धर्मः।

# शब्दकल्पद्रुमः।

## द्वितीयकाण्डम्।



क, ककारः। (वर्णस्य स्वरूपग्रहणाय कारः।) स तु व्यञ्जनप्रथमवर्णः। अस्योच्चारणस्थानं कण्ठः। इति व्याकरणम्॥ (तथा चोक्तम् "तुल्यास्य प्रयत्नं सवर्णं"। १। १। ९। सिद्धान्तकौमुद्याम्।
"अकुहविसर्जनीयानाङ्कण्ठः"॥ इति॥ *॥)
(वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा,—
"वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो मात्रा साक्षात् सरस्वती॥
कुण्डली चाङ्कुशाकारा मध्यशून्यं सदाशिवः।
कदम्बगोलकाकारं ककारं भावयेत् सुधीः"॥
इति वर्णोद्धारतन्त्रम्॥ *॥ तस्य नामानि यथा,—
"कः क्रोधीशो महाकाली कामदेवप्रकाशकः।
कपाली तेजसः शान्तिर्वासुदेवो जयानलः॥
चक्री प्रजापतिः सृष्टिर्दक्षस्कन्धो विशाम्पतिः।
अनन्तः पार्थिवो विन्दुस्तापिनी परमात्मकः॥
वर्गाद्यश्च सुखी ब्रह्मा सखाद्योऽम्भः शिवो जलम्।
माहेश्वरी तुषा पुष्पा मङ्गलस्वरणं करः॥
नित्या कामेश्वरी मुख्यः कामरूपो गजेन्द्रकः।
श्रीपुरं रमणो रक्तकुसुमा परमात्मकः"॥
इति तन्त्रशास्त्रम्॥
"अधुना संप्रवक्ष्यामि ककारतत्त्वमुत्तमम्।
रहस्यं परमाश्चर्य्यं त्रैलोक्यानाञ्च संप्रणु॥
वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो मात्रा साक्षात् सरस्वती॥
कुण्डली अङ्कुशाकारा मध्ये शून्यः सदाशिवः।
जवायावकसंकाशा वामरेखा वरानने!॥
शरच्चन्द्रप्रतीकाशा दक्षरेखा च मूर्त्तिमान्।
अधोरेखा वरारोहे! महामरकतद्युतिः॥
शङ्खकुन्दसमा कीर्त्तिर्म्मात्रा साक्षात् सरस्वती।
कुण्डली अङ्कुशा या तु कोटिविद्युल्लताकृतिः॥
कोटिचन्द्रप्रतीकाशो मध्ये शून्यः सदाशिवः।
शून्यगर्भे स्थिता काली कैवल्यपददायिनी॥
ककाराज्जायते सर्व्वं कामं कैवल्यमेव च।
अर्थञ्च जायते देवि! तथा धर्म्मश्च नान्यथा॥
ककारः सर्व्ववर्णानां मूलप्रकृतिरेव च।
ककारः कामदा कामरूपिणी स्फुरदव्यया॥
कामनीया महेशानि! स्वयं प्रकृतिसुन्दरी।
माता सा सर्व्वदेवानां कैवल्यपददायिनी॥
ऊर्द्ध्वकोणे स्थिता कामा ब्रह्मशक्तिरितीरिता।
वामकोणे स्थिता ज्येष्ठा विष्णुशक्तिरितीरिता॥
दक्षकोणे स्थिता विन्दू रौद्री संहाररूपिणी।
ज्ञानात्मा स तु चार्व्वङ्गि! कलाचतुष्टयात्मकः॥
इच्छाशक्तिर्भवेद्ब्रह्मा विष्णुश्च ज्ञानशक्तिमान्।
क्रियाशक्तिर्भवेद्रुद्रः सर्व्वे प्रकृतिमूर्त्तिमान्॥
आत्मविद्या शिवस्तत्र सदा मन्त्रः प्रतिष्ठितः।
आसनं त्रिपुरादेव्याः ककारं पञ्चदैवतम्॥
ईश्वरो यस्तु देवेशि! त्रिकोणे तस्य संस्थितिः।
त्रिकोणमेतत् कथितं योनिमण्डलमुत्तमम्॥
केवलं प्रपदे यस्याः कामिनी सा प्रकीर्त्तिता।
ॐ जवायावकसिन्दूरसदृशीं कामिनीं परम्॥
चतुर्भुजां त्रिनेत्राञ्च बाहुवल्लीविराजिताम्।
कदम्बकोरकाकारस्तनद्वयविभूषिताम्॥
रत्नकङ्कणकेयूरमङ्गदैरुपशोभिताम्।
रत्नहारैः पुष्पहारैः शोभितां परमेश्वरीम्॥
एवं हि कामिनीं ध्यात्वा ककारं दशधा जपेत्।
प्रफुल्लश्च ततो ध्यात्वा जपस्य फलभाग्भवेत्॥
एतत्ते कथितं देवि! ककारतत्त्वमुत्तमम्"॥
इति कामधेनुतन्त्रम्॥ (अनुबन्धविशेषः। यथाह कविकल्पद्रुमः। "कस्त्वरादिः किन्तु वा"। एतेन गणात् क संख्याने गणयति कथत् क वाक्यप्रबन्धे कथयति इत्यादि स्यात्॥)

कं, क्ली, (कायति शब्दो निर्गच्छति यतः यस्मिन् सतीत्यर्थः सजिह्ववदनस्य शिरोऽन्तर्वर्त्तित्वात्। यद्वा कायति वर्णात्मकं ध्वन्यात्मकं वा शब्दं करोति जीवः यस्मिन् सतीति यावत्॥ कै शब्दे "अन्येभ्योऽपि दृश्यते" डः। ३। २। १०१।)
शिरः॥ (यथा, तन्त्रसारे।
"द्वाभ्यामोष्ठौ दिरुन्मृज्य चैकेन क्षालयेत्करम्।
मुख-घ्राण-नेत्र-श्रोत्र-नाभ्युरस्कं भुजौ क्रमात्"॥
अत्र कं शिरः इति तट्टीका॥ कायति शब्दायते स्रोतोवेगेनालोड़नेन वेति यावत्।) जलम्॥
(यथा, भागवते ६। १। ४२।
"सूर्य्योऽग्निः खं मरुद्गावः सोमः सन्ध्याहनीदिशः।
कं कुः कालो धर्म्म इति ह्येते दैह्यस्य साक्षिणः"॥
कायन्ति आनन्दोत्सवध्वनिं कुर्व्वन्ति यस्मिन् समागते उपस्थिते इत्यर्थः गृहिण इति शेषः। आनन्दध्वनेस्तु सुखानुवर्त्तित्वात्।) सुखम्। इति मेदिनी॥
(यथा, छान्दोग्योपनिषदि। ४। १०। ५।
"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत् प्राणो ब्रह्म कञ्च तु खञ्च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणञ्च हास्मै तदाकाशञ्चोचुः"॥
"तमेवमुक्तवन्तं ब्रह्मचारिणं ते ह्यग्नयः ऊचुः। यद्वाव यदेव वयं कमवोचाम तदेव खमाकाशम् इत्येवं खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजातसुखान्निवर्त्तितं स्यान्नीलेनेव विशेष्यमाणमुत्पलं रक्तादिभ्यः॥ यदेव खमाकाशमवोचाम तदेव च कं सुखमिति जानीहि एवञ्च सुखेन विशेष्यमाणं खं भौतिकादचेतनात् खान्निवर्त्तितं स्यान्नीलोत्पलवदेव"। इति भाष्यम्॥ कचते दीप्यते मस्तकोपरि शोभते इति भावः। यद्वा कच्यते बध्यते संयम्यते कराभ्याम्। कच् बन्धने डः।)
केशः॥ इति धरणी॥

कः, पुं, (कचति दीप्यते स्वेन ज्योतिषा ज्योतिर्म्मयत्वात् कच्+ड।) ब्रह्मा (यथा, भागवते। ३। १२। ५१।
"एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा।
कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते"॥)
विष्णुः। (यथा महाभारते। १३। विष्णोः सहस्रनामकथने। १४९। ९१।
"एको नैकः सवः कः किं यत् तत्पदमनुत्तमम्"॥
प्रजापतिः। यथा भागवते। ८। ५। ३९।
"स्वेभ्यश्च छन्दांस्यृषयो मेढ्रतः कः
प्रसीदतां नः स महाविभूतिः"॥)
दक्षः। (यथा भागवते। ९। १०। १०॥
"जघ्नेऽद्भुतैणवपुषाऽश्रमतोऽपकृष्टो